Roll No. | | | | | | |

Candidates must write the Set No on the title page of the answer book.

# SAHODAYA PRE BOARD EXAMINATION – 2024-25

## CLASS – X

## Sub.: COMMUNICATIVE SANSKRIT (119)

**Time Allowed: 3 hours** **Maximum Marks: 80**

**समयः - होरात्रयम्** **पूर्णाङ्काः - 80**

**General Instructions:**

**सामान्यनिर्देशाः -**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्ना: सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति ।
4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

**प्रश्नपत्रस्वरूपम् –**

| | | | |
|---|---|---|---|
| **'क' भागः** | : | **अपठितावबोधनम्** | **10 अङ्काः** |
| **'ख' भागः** | : | **रचनात्मककार्यम्** | **15 अङ्काः** |
| **'ग' भागः** | : | **अनुप्रयुक्तव्याकरणम्** | **25 अङ्काः** |
| **'घ' भागः** | : | **पठितावबोधनम्** | **30 अङ्काः** |

| | | |
|---|---|---|
| | **'क' भागः**<br>**अपठितावबोधनम् (10 अङ्काः)** | |
| **1.** | **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**<br>संस्कृतिः मानवसमाजस्य अतिप्राचीना अमूल्या च निधिः अस्ति । या मनसः आत्मनः वा संस्कारं करोति, सा संस्कृतिः भवति । संस्कृतिः मानवमनसः अज्ञानम् अपहरति, ज्ञानज्योतिं प्रकाशयति सत्यवृत्तिं संस्थापयति शान्तिं च प्रददाति । संस्कृतिः मानवस्य, | **10** |

| | | |
|---|---|---|
| | राष्ट्रस्य विश्वस्य च उपकारं करोति । संस्कृतिः एव मानवहृदयेषु विश्वबन्धुत्वभावनाम् उत्पाद्य लोकहिताय कल्पते । भारतीयसंस्कृतिः स्वमहत्त्वहेतोः समस्त-विश्वसंस्कृति-मण्डले सूर्यस्य ज्योतिः इव ज्वलति । भारतीयाः अनुभवन्ति यत् जगतः सर्वे धर्माः मोक्षप्रदायकाः सन्ति । सर्वे धर्माः अन्ततः एकमेव लक्ष्यं प्रति गच्छन्ति । भारतीयसंस्कृतौ हिंसायाः किञ्चिद् अपि स्थानं न अस्ति । अस्यां संस्कृतौ आत्मत्यागस्य भावना समाहिता । अतः भारतीयसंस्कृतेः विशेषताः सन्ति परधर्मसहिष्णुता, आत्मशुद्धिः नारीसम्मानं च इति । | |
| | **अ. एकपदेन उत्तरत -(केवलं प्रश्नद्वयम्)**<br>(i) संस्कृतिः कस्य अज्ञानम् अपहरति ?<br>(ii) भारतीयसंस्कृतौ कस्याः स्थानं न अस्ति ?<br>(iii) संस्कृतिः मानवमनसः कां प्रकाशयति ? | **1x2=2** |
| | **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) भारतीय-संस्कृतौ कस्य भावना समाहिता ?<br>(ii) भारतीयानां धर्मविषये कीदृशाः विचाराः सन्ति ?<br>(iii) भारतीयसंस्कृतेः काः विशेषताः सन्ति ? | **2x2=4** |
| | **इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** | **1** |
| | ई. **यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)**<br>(i) 'सर्वे धर्माः अन्ततः एकमेव लक्ष्यं प्रति गच्छन्ति' – इत्यस्मिन् वाक्ये 'गच्छन्ति' इति क्रियापदस्य कर्तृपदं किमस्ति ?<br>(क) सर्वे (ख) धर्माः (ग) एकमेव (घ) लक्ष्यं<br>(ii) 'निधि' इति विशेष्यपदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम् ?<br>(क) भावना (ख) संस्कृतिः (ग) अमूल्या (घ) च<br>(iii) 'संस्कृतिः एव मानवहृदयेषु विश्वबन्धुत्वभावनाम् उत्पाद्य लोकहिताय कल्पते' – अस्मिन् वाक्ये क्रियापदं किम् अस्ति ?<br>(क) संस्कृतिः (ख) एव (ग) कल्पते (घ) उत्पाद्य<br>(iv) 'अपकारं' इति पदस्य गद्यांशे किं विलोमपदं प्रयुक्तम् ?<br>(क) लोकहिताय (ख) उपकारं (ग) सहिष्णुता (घ) आत्मशुद्धिः | **1x3=3** |

| 'ख' भागः<br>रचनात्मककार्यम् (15 अङ्काः) | | |
|---|---|---|
| **2.** | **भवान् सुमितः। योगस्य महत्त्वं वर्णयन् स्वमित्रम् अमितं प्रति पत्रं मञ्जूषातः पदानां सहायतया पूरयित्वा लिखत-**<br><br>परीक्षाभवनम्<br>प्रियमित्र अमित! दिनाङ्कः ___<br>नमोनमः ।<br>अत्र कुशलं तत्रास्तु । मम पित्रा योगदिवसे (i) __________प्रचारार्थं स्वक्षेत्रे योगशिविरस्य आयोजनं कृतम् । तस्मिन् (ii) __________ योगविद्यायां कुशलाः अनेके (iii) __________आगत्य स्वविचारान् प्रकटितवन्तः । एवं ते (iv) __________ योगस्य जीवने स्वीकारार्थं (v) __________। योगेन किं किं (vi) __________ किं किं च प्राप्यते इति अपि (vii) __________ स्पष्टीकृतम् । तेषाम् उद्बोधकानां विचाराणाम् ईदृशः (viii) __________ जातः येन ये अपि जनाः तत्र (ix) __________ ते योगप्रक्रियां जीवने धारणार्थं (x) __________ अकुर्वन् । यदि भवान् अपि अत्र स्यात् स्वयम् एव तत् पश्येत् । अस्तु! शेषं सर्वं कुशलम् ।<br>भवतः मित्रम्<br>सुमितः<br><br>**मञ्जूषा**<br>**जनान्, योगस्य, आगताः, प्रभावः, कार्यक्रमे, सिध्यति, प्रेरितवन्तः, जनाः, तैः, प्रतिज्ञाम्** | **1/2x10=5** |
| **3.** | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत-** | **1x5=5** |
| | <br><br>**मञ्जूषा**<br>**भारतस्य, जनाः, निर्वाचन-आयोगः, बालिकाः, बालकाः अष्टादशवर्षीयाः, निर्वाचन-पेटिकां, पिञ्जं, नुदन्ति, हरितं विद्युत्, मसी-पात्रम्, मसी, अङ्गुलिं कुर्वन्ति, दर्शयन्ति, मतदातापत्रम्** | |

**अथवा** **1x5=5**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चसंस्कृतवाक्येषु एकम् अनुच्छेदं लिखत-**

**वृक्षाणां महत्त्वम्**

**मञ्जूषा**

| |
|---|
| **वृक्षस्य , प्रान्तरे , मया , दृश्यते , जीवनम् , अस्माकं , वृक्षारोपणम् , पर्यावरणम् , यच्छन्ति, प्राणिनाम्, सुन्दरम्, परोपकार:, प्राणवायुम्, आश्रयम्, शुद्धम्** |

**4.** **मञ्जूषाप्रदत्तपदै: रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुन: लिखत -** **1x5=5**

प्रवीर: – श्व: अस्माकं समावर्त्तन-संस्कार: भविष्यति । न जाने कथं द्रुतगत्या वर्षाणि व्यतीतानि ।

अतुल: – (i)________________________?

प्रवीर: – अहं तु अभियन्त्रविज्ञानं पठिष्यामि ।

देवेश: – मया तु चिकित्साविज्ञानं पठिष्यते ।

नीलिमा – (ii)________________________।

वैष्णवी – अहं 'मधुवनीचित्रकला' इत्यस्य प्रशिक्षणं प्राप्य कुटीरोद्योगं चालयिष्यामि । मह्यं चित्राङ्कनम् अतीव रोचते ।

अतुल: - (iii)________________________।

मण्डन: – अहो ! कीदृशम् आश्चर्यम्, (iv)________________________ ।

देवेश: – मण्डन ! तव गणितक्षेत्रे दक्षतां दृष्ट्वा त्वयि भविष्यस्य गणितज्ञं पश्यामि अहम् । त्वं कृषिकार्यं करिष्यसि ?

मण्डन: – (v)________________________।

अवनीश: – सम्यक् कथितम् । अधुना तु सर्वकारेण भूमिस्वास्थ्यपत्रम् अपि प्रदीयते येन भूमिस्वास्थ्यपरीक्षणं भवति ।

सर्वे – भूमे: अपि स्वास्थ्यस्य परीक्षणम्? (हसन्ति)

अवनीश: – अथ किम् । भूमे: अपि स्वास्थ्यपरीक्षणं कर्तव्यम् ।

**मञ्जूषा**

- द्वादशकक्षानन्तरं त्वं कस्मिन् क्षेत्रे भविष्यनिर्माणं करिष्यसि ?
- अथ किम् । वैज्ञानिकरीत्या कृषिकार्यं कृत्वा अहं देशस्य कृषिसम्पद: विकासे योगदानं करिष्यामि ।
- कक्षाया: सर्वाधिका मेधाविनी छात्रा वस्त्रालङ्करणविज्ञाने भविष्यनिर्माणं करिष्यति ?
- अहं वस्त्रालङ्करणविज्ञानं पठिष्यामि ।
- अहमपि कृषिविज्ञानं पठित्वा कृषिकार्यं करिष्यामि ।

| | | |
|---|---|---|
| | **अथवा**<br>**मज्जूषाया: सहायतया अधोलिखितां कथां पूरयित्वा पुन: लिखत -**<br>एकदा गुरु: द्रोणाचार्य: दुर्योधनम् (i) ____________ आदिशत् - वत्स! नगरे सर्वाधिकं गुणवन्तं जनम् अन्विष्य (ii) ____________। दुर्योधन: सम्पूर्ण-नगरम् (iii) __________आगच्छत् । स: सर्वत्र (iv) __________ कृत्वा गुरो: समीपम् आगत्य अवदत्-भगवन्! (v) __________ मत्त: गुणवत्तर: कोऽपि नास्ति इति । आचार्य: पुन: युधिष्ठिरम् आहूय (vi) ____________ -वत्स ! संसारे सर्वाधिकं गुणहीन-जनम् (vii) __________ आनय इति । युधिष्ठिर: आगत्य अवदत् - प्रभो! मम सदृश: गुणहीन: संसारे कोऽपि नास्ति । आचार्य: (viii) __________आशिषम् अयच्छत् - प्रियपुत्र ! तव (ix) __________ संसारे कदापि न नंक्ष्यति । नूनं सत्यमेव उच्यते - यथा दृष्टि: तथा (x)__________ ।<br>**मञ्जूषा**<br>**अन्वेषणं, नगरे, आहूय, सृष्टि: , आदिष्टवान्, अन्विष्य, भ्रान्त्वा, आनय, युधिष्ठिराय, कीर्ति:** | **1/2x10=5** |

| | | |
|---|---|---|
| | **'ग' भाग:**<br>**अनुप्रयुक्तव्याकरणम् (25 अङ्का:)** | |
| **5.** | **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-**<br>**(केवलं प्रश्नचतुष्टयम्)**<br>(i) माधुर्यमक्षरव्यक्ति: <u>**पद + छेद:**</u> तु सुस्वर: ।<br>(ii) राजा स्वेषु <u>**गात्रेष्वपि**</u> निरासक्तिम् अमन्यत ।<br>(iii) कामात् <u>**क्रोध: + अभिजायते**</u> ।<br>(iv) क: स्यात् <u>**पापतरस्तत:**</u> ।<br>(v) तत्र <u>**जलपानादनन्तरं**</u> गमिष्याम: । | **1x4=4** |
| **6.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) ऊहापोहार्थविज्ञानं तत्वज्ञानं च <u>**धीगुणा:**</u> ।<br>(क) धिय: गुणा: (ख) ध्यात्वा गुणा:<br>(ग) धियस्य गुणा: (घ) धिया: गुणा:<br>(ii) <u>**हिमाद्रे: तुङ्गश्रृङ्गै:**</u> सुशोभिता सूर्योदयभूमि: इयम् ।<br>(क) हिमाद्रिश्रृङ्गा: (ख) हिमाद्रितुङ्गै:<br>(ग) तुङ्गहिमाद्रिश्रृङ्गै: (घ) हिमाद्रितुङ्गश्रृङ्गै: | **1x4=4** |

| | | |
|---|---|---|
| | (iii) विमूढ़धी: **<u>धर्मं प्रददाति इति, तां</u>** वाचं त्यक्त्वा परुषां वदति ।<br>(क) धर्मप्रदं (ख) धार्मिकप्रदां<br>(ग) धर्मप्रदानं (घ) धर्मप्रदां<br>(iv) स: **<u>सकरुणम्</u>** उच्चै: अक्रन्दत् ।<br>(क) करुणया सह (ख) सह करुणम्<br>(ग) करुणा सह (घ) सा करुणा<br>(v) तत: प्रविशत: **<u>व्यासनारदौ</u>** ।<br>(क) व्यास: नारद: (ख) व्यासौ नारदौ च<br>(ग) व्यास: नारदौ च (घ) व्यास: च नारद: च | |
| **7.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) कथं **<u>मन्दभाग्य + टाप्</u>** अहं धैर्यं धारयामि ?<br>(क) मन्दभाग्य: (ख) मन्दभाग्यम्<br>(ग) मन्दभाग्यो (घ) मन्दभाग्या<br>(ii) वयम् अत्रत्यानां **<u>इतिहास + ठक्</u>** स्थलानां विषये ज्ञातुम् इच्छाम: ।<br>(क) ऐतिहासिक (ख) ऐतिहासिकानां<br>(ग) इतिहासानां (घ) ऐतिहासिका:<br>(iii) भगवान् बोधिसत्त्व: अपूर्व: **<u>धैर्य + मतुप्</u>** अपि आसीत् ।<br>(क) धैर्यमान् (ख) धैर्यमान्य:<br>(ग) धैर्यवान् (घ) धैर्यवत्<br>(iv) अहो अज्ञानं **<u>भवत् + ङीप्</u>**!<br>(क) भवत्य (ख) भवती<br>(ग) भवत्या: (घ) भवत्याम्<br>(v) केचन **<u>पञ्चत्वं</u>** गता: ।<br>(क) पञ्च + त्व (ख) पञ्च + त्वम्<br>(ग) पञ्च + तल् (घ) पञ्च + टाप् | **1x4=4** |
| **8.** | **वाच्यानुसारम् उचितपदै: रिक्तस्थानानि पूरयत । (केवलं प्रश्नत्रयम्)**<br>(i) _______ देशसेवा क्रियते ।<br>(ii) अहं गृहं _______ ।<br>(iii) अस्माभि: परीक्षा _______ ।<br>(iv) छात्रै: _______ पठ्यन्ते ।<br>**मञ्जूषा – लिख्यते, पाठा:, सेवकै:, गच्छामि** | **1x3=3** |

| | | |
|---|---|---|
| **9.** | **कालबोधकशब्दै: अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत -**<br>**(केवलं प्रश्नत्रयम्)**<br>(i) विद्यालये (7.15) ________ वादने प्रार्थनासभा भवति ।<br>(ii) प्रात: (10.00) ________ अर्धावकाश: भवति ।<br>(iii) मध्याह्ने (11.45) ________ विविधा: क्रीडा: आयोज्यन्ते ।<br>(iv) छात्रा: (1.30) ________ वादने गृहं गच्छन्ति । | **1x3=3** |
| **10.** | **मञ्जूषायां प्रदत्तै: उचितै: अव्ययपदै: अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत -**<br>**(केवलं प्रश्नचतुष्टयम्)**<br>(i) नीलोत्पलम्_______एकं चक्षु: उत्पाट्य समर्पितवान् ।<br>(ii) अत्र तु ग्रन्थचक्रिका _______ अस्ति ।<br>(iii) सूपकाराणां मेषेण सह कलह: _______वानराणां विनाशकारणं भविष्यति ।<br>(iv) पतितात् कलशात्_______निर्गत्य सर्प: दुष्टबुद्धिं दष्टवान् ।<br>(v) न तावत् कलहेन समयं _______यापयेत ।<br>**मञ्जूषा – अपि, बहि:, इव, वृथा, नूनं** | **1x4=4** |
| **11.** | **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुन: लिखत - (केवलं प्रश्नत्रयम्)**<br>(i) नाहं त्वत्त: ब्रह्मास्त्रम् इच्छति ।<br>(क) इच्छत: (ख) इच्छामि (ग) इच्छथ: (घ) इच्छन्ति<br>(ii) तेषु कश्चित् उद्दण्ड: बालक: उवाच ।<br>(क) काचित् (ख) केचित् (ग) कांश्चित् (घ) कश्चित्<br>(iii) अत्र अनेकानि प्रमुखोत्सवा: ।<br>(क) अनेका: (ख) अनेका (ग) अनेके (घ) अनेक:<br>(iv) पुरा कस्मिंश्चित् नगरे चन्द्रो नाम भूपति: प्रतिवसति ।<br>(क) प्रतिवसत: (ख) प्रतिवसति स्म (ग) प्रतिवसामि (घ) प्रतिवससि | **1x3=3** |
| | **'घ' भाग:**<br>**पठितावबोधनम् (30 अङ्का:)** | |
| **12.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>तस्य वचनम् अश्रद्धेयं मत्वा मदोद्धता: कपय: प्रहस्य अवदन् –'भो! किमिदम् उच्यते? न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार – तिक्त-कषाय-कटु-रूक्षफलानि भक्षयिष्याम:।' तच्छ्रुत्वा साश्रुनयनो यूथपति: सगदगदम् उक्तवान् – 'रसनास्वादलुब्धा: यूयम् अस्य सुखस्य कुपरिणामं न जानीथ । अहं तु वनं गच्छामि ।' अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडित:। | **5** |

| | | |
|---|---|---|
| | ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति । तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः । | |
| | **अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) मदोद्धताः के आसन् ?<br>(ii) मेषः सूपकारेण केन ताडितः ?<br>(iii) वह्निज्वालाः कुत्र समुत्थिताः ?<br>**आ.पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) साश्रुनयनो यूथपतिः सगद्गदम् किम् उक्तवान् ?<br>(ii) मेषः किमर्थं भूमौ लुठति ?<br>**(iii)** कीदृशः मेषः अश्वशालां प्रविशति ?<br>**इ. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) 'लुठति' क्रियापदस्य किं कर्त्तृपदं गद्यांशे प्रयुक्तम् ?<br>(ii) 'अहनि' इति पदस्य किं विशेषणपदं प्रयुक्तम् ?<br>(iii) 'वने' इत्यस्य किं पर्यायपदम् अत्र प्रदत्तम् ? | **1/2x2=1**<br><br><br><br>**1x2=2**<br><br><br><br>**1x2=2** |
| **13.** | **अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च ।<br>न कुर्यादहितं कर्म स परेभ्यः कदापि च ।।<br>पापिनाञ्च सदा दुःखं सुखं वै पुण्यकर्मणाम् ।<br>एवं स्थिरतरं ज्ञात्वा साधुवृत्तिं समाचरेत् ।।<br>**अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) पुण्यकर्मणां फलं किम् ?<br>(ii) नरः प्रभूतानि कानि इच्छति ?<br>(iii) मनुष्यः कां समाचरेत् ?<br>**आ. पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) केषां सदा दुःखं भवति ?<br>(ii) किं स्थिरतरम् इति जानीयात् ?<br>(iii) किम् इच्छन् नरः परेभ्यः अहितं न कुर्यात् ?<br>**इ. निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) 'प्रेयः' इति पदस्य श्लोके किं विलोमपदं प्रयुक्तम् ?<br>(ii) 'कुर्यात्' इति क्रियायाः कर्त्तृपदं किम् ?<br>(iii) 'कर्म' इति विशेष्यस्य किं विशेषणं प्रदत्तम् ? | **5**<br><br><br><br><br>**1/2x2=1**<br><br><br><br>**1x2=2**<br><br><br><br>**1x2=2** |

| | | |
|---|---|---|
| **14.** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>**अश्वत्थामा–** रे दुष्ट भीम! त्वम् अद्य वध्योऽसि मया । (विलोक्य) अये कथं श्रीकृष्णार्जुनौ युधिष्ठिरश्च ? (स्वगतम्) इदानीं किं करवाणि ? आ: दृष्टम्, अस्मिन् विषमे समये ब्रह्मास्त्रं एव मे शरणम् । मोचयामि अस्त्रम् । (ध्यानं नाटयति ब्रवीति च) इदम् अपाण्डवाय ।<br>**श्रीकृष्णः -** पार्थ! पश्य, पश्य । एतद् विमुच्यते ब्रह्मास्त्रं द्रोणपुत्रेण! त्रैलोक्यं दहन् इव प्रचण्डज्वाल: अग्नि: परित: प्रसरति । अर्जुन! त्वमपि मुञ्च ब्रह्मास्त्रम् एतत् निवारयितुम्।<br>**अर्जुनः –** नम: भगवते । स्वस्ति आचार्यपुत्राय, स्वस्ति मे भ्रातृभ्य: । उत्सृज्यते मया ब्रह्मास्त्रम् । अस्त्रम् अस्त्रेण शाम्यताम् ।<br>(तत: प्रविशत: व्यासनारदौ)<br>**नारदः –** (व्यासं प्रति) पश्यतु भवान् । कोऽयम् अनर्थ: क्रियते एताभ्यां वीराभ्याम् । समन्तात् वर्धमाना: प्रचण्डानलशिखा: आकाशं लिहन्ति इव । गगनात् सहस्रश: उल्का: भूमौ पतन्ति । कम्पते खलु सपर्वत-वन-द्रुमा सकला मही । पवन: स्तब्ध: जात: । सहस्रांशु: न भासते । शैला: विदीर्यन्ते । कथमपि एतौ निवारणीयौ, अन्यथा सकलं जगद् ध्वस्तं भविष्यति । | **5** |
| | **अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) क: न भासते ?<br>(ii) गगनात् का: भूमौ पतन्ति ?<br>(iii) केन ब्रह्मास्त्रं विमुच्यते ? | **1/2x2=1** |
| | **आ. पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) का कम्पते ?<br>(ii) आकाशं का: लिहन्ति इव ?<br>(iii) कीदृश: अग्नि: प्रसरति ? | **1x2=2** |
| | **इ. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) 'पृथ्वी' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?<br>(ii) 'उल्का:' इति पदस्य विशेषणपदं चित्वा लिखत ।<br>(iii) 'पश्य' इति क्रियाया: कर्तृपदं किम् ? | **1x2=2** |
| **15.** | **रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं पञ्चप्रश्ना:)**<br>(i) तस्मात् त्वम् <u>**आदौ**</u> इन्द्रियाणि नियम्य पाप्मानं प्रजहि ।<br>(ii) <u>**प्राज्ञ:**</u> कलहयुक्तं गृहं दूरत: परिवर्जयेत् ।<br>(iii) <u>**आयुष:**</u> एक: अपि क्षण: स्वर्णकोटिकै: न लभ्यते ।<br>(iv) अभीष्टवस्तूनि प्राप्य <u>**याचका:**</u> सन्तुष्टा: आसन् । | **1x5=5** |

| | | |
|---|---|---|
| | (v) <u>**अनुद्वेगकरं**</u> वाक्यं वाङ्मयं तपः उच्यते ।<br>(vi) धैर्यम् <u>**आपदां**</u> तरणिः । | |
| **16.** | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत-**<br>**अधुना रमणीया हि सृष्टिरेषा जगत्पतेः ।**<br>**जीवाः सर्वेऽत्र मोदन्तां भावयन्तः परस्परम् ।।**<br>**अन्वयः-** एषा (i) _______ सृष्टिः हि (ii) _______ रमणीया । (iii) _______ जीवाः अत्र (iv) _______ भावयन्तः मोदन्ताम् ।<br>**मञ्जूषा - अधुना, परस्परं, जगत्पतेः सर्वे**<br>**अथवा**<br>**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत-**<br>**चञ्चलं हि मनः कृष्ण! प्रमाथि बलवद्दृढम्**<br>**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ।।**<br>**भावार्थः-** श्रीकृष्णस्य वचः श्रुत्वा पुनः धनुर्धरः अर्जुनः वदति - हे कृष्ण! इदं मनः अतीव (i)_______ । इदं शरीरस्य मन्थनकर्ता, (ii)_______ बलवत् अपि अस्ति । अतः अहं तस्य (iii)_______ वायोः नियन्त्रणम् इव अतीव (iv)_______ मन्ये ।<br>**मञ्जूषा - बलवत्सु, कठिनं, चञ्चलम्, नियन्त्रणं** | **1/2x4=2**<br><br>**1/2x4=2** |
| **17.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) जनाः परस्परं मुखे कपोले च <u>**शालिचूर्णं**</u> लिम्पन्ति ।<br>क) प्रस्तरचूर्णम् ख) रक्तचूर्णम् ग) मृत्तिकाचूर्णम् घ) अक्षतचूर्णम्<br>(ii) <u>**नेपथ्ये**</u> काकध्वनिः श्रूयते ।<br>क) वने ख) वृक्षस्य अधः ग) सरस्तीरे घ) रङ्गमञ्चस्य पृष्ठे<br>(iii) विमूढधीः अपक्वं फलं <u>**भुङ्क्ते**</u> ।<br>क) खादति ख) त्यजति ग) इच्छति घ) यच्छति<br>(iv) ऊर्णाप्रचुरः मेषः दाहवेदनया <u>**भूमौ**</u> लुठति ।<br>क) क्षितौ ख) महानसौ ग) राजभवने घ) अटव्यां<br>(v) भगवान् <u>**बोधिसत्वः**</u> शिवीनां राजा अभवत् ।<br>क) दानशाला ख) प्रबुद्धः ग) राज्यस्य घ) पुण्यफलैः | **1x4=4** |

| | | |
|---|---|---|
| **18.** | **मञ्जूषाप्रदत्तपदानां सहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत -**<br>दुष्टबुद्धिः तु तस्य (i) _______तिरस्कृत्य ग्रामाभिमुखं प्राचलत्। प्रच्छन्नभाग्यः तु समुपजातविवेकः (ii)_______ प्रतिनिवृत्तः। गृहे तस्य (iii) _______ सपदि समागतं पतिं दृष्ट्वा (iv)_______ आर्य! किं सर्वगतं कुशलं वर्तते? अयथाकालं समागतोऽसि? सम्प्रति धर्ममतिः सः (v)_______ दग्धमानसः सर्वं वृत्तान्तं निवेद्य सकरुणम् (vi)_______ अक्रन्दत्। (vii)_______ सा अवदत्-अलं चिन्तया। आपदां तरणिः धैर्यम्। इदानीं विषादं त्यक्त्वा (viii)_______ क्रियताम्।<br>**मञ्जूषा**<br>स्वगृहं, सद्वचनानि, अपृच्छत्, भार्या, उच्चैः, बुद्धिमती, उद्यमः, पश्चात्तापेन | 1/2x8=4 |

◆◆◆